# shrIviThThalAShTottarashatanAmastotram

# શ્રીવિઠ્ઠલાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : viThThalAShTottarashatanAmastotram

File name : viThThalAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Source : padmamuprANa

Latest update : March 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવિઠ્ઠલાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રુત્વા નામસહસ્રં શ્રીવિઠ્ઠલસ્ય ગુણાન્વિતમ્ ।
પાર્વતી પરિપપ્રચ્છ શઙ્કરં લોકશઙ્કરમ્ ॥ ૧॥

શ્રીપાર્વત્યુવાચ ॥

દેવદેવ મહાદેવ દેવાનુગ્રહવિગ્રહ ।
અષ્ટોત્તરશતં નામ્નાં તસ્ય દેવસ્ય મે વદ ॥ ૨॥

જનઃ કલિમલાદિગ્ધોઽલસઃ કામાવિલો જડઃ ।
પાઠાદ્યસ્ય સકૃદ્વાપિ સૌશીલ્યાદિયુતો ભવેત્ ॥ ૩॥

તદહં શ્રોતુમિચ્છામિ તવાજ્ઞાતં ન વિદ્યતે ।
ઇત્યુક્તો ભાર્યયા શમ્ભુઃ સંસ્મરન્ પુરુષોત્તમમ્ ॥ ૪॥

કટિસ્થિતકરદ્વન્દ્વં જગાદ નગપુત્રિકામ્ ।
શ્રીશઙ્કર ઉવાચ
દેવિ લોકોપકારાય કૃતઃ પ્રશ્નસ્ત્વયાનઘે ॥ ૫॥

હિતાય સર્વજન્તૂનાં નામ્નામષ્ટોત્તરં શતમ્ ।
શ્રીવિઠ્ઠલસ્ય દેવસ્ય વાગ્મિસિદ્ધિપ્રદં નૃણામ્ ॥ ૬॥

અષ્ટોત્તરશતસ્યાહમૃષિઃ પ્રોક્તો મનીષિભિઃ ।
છન્દોઽનુષ્ટુબ્દેવતા શ્રીવિઠ્ઠલઃ પરિકીર્તિતઃ ॥ ૭॥

ધ્યાયેચ્છ્રીવિઠ્ઠલાખ્યં સમપદકમલં પદ્મપત્રાયતાક્ષં
ગમ્ભીરસ્નિગ્ધહાસં કટિનિહિતકરં નીલમેઘાવભાસમ્ ।
વિદ્યુદ્વાસો વસાનં મણિમયમકુટં કુણ્ડલોદ્ભાસિગણ્ડં
માયૂરસ્રગ્વિભૂષાભયવરસહિતં કૌસ્તુભોદ્ભાસિતાઙ્ગમ્ ॥ ૮॥

ૐ ક્લીં વિઠ્ઠલઃ પુણ્ડરીકાક્ષઃ પુણ્ડરીકનિભેક્ષણઃ ।
પુણ્ડરીકાશ્રમપદઃ પુણ્ડરીકજલાપ્લુતઃ ॥ ૯॥

પુણ્ડરીકક્ષેત્રવાસઃ પુણ્ડરીકવરપ્રદઃ ।
શારદાધિષ્ઠિતદ્વારઃ શારદેન્દુનિભાનનઃ ॥ ૧૦॥

નારદાધિષ્ઠિતદ્વારો નારદેશપ્રપૂજિતઃ ।
ભુવનાધીશ્વરીદ્વારો ભુવનાધીશ્વરીશ્વરઃ ॥ ૧૧॥

દુર્ગાશ્રિતોત્તરદ્વારો દુર્ગમાગમસંવૃતઃ ।
ક્ષુલ્લપેશીપિનદ્ધોરુગોપેષ્ટ્યાશ્લિષ્ટજાનુકઃ ॥ ૧૨॥

કટિસ્થિતકરદ્વન્દ્વો વરદાભયમુદ્રિતઃ ।
ત્રેતાતોરણપાલસ્થત્રિવિક્રમ ઇતીરિતઃ ॥ ૧૩॥

તિતઊક્ષેત્રપોડશ્વત્થકોટીશ્વરવરપ્રદઃ ।
સ એવ કરવીરસ્થો નારીનારયણેતિ ચ ॥ ૧૪॥

નીરાસઙ્ગમસંસ્થશ્ચ સૈકતપ્રતિમાર્ચિતઃ ।
વેણુનાદેન દેવાનાં મનઃ શ્રવણમઙ્ગલઃ ॥ ૧૫॥

દેવકન્યાકોટિકોટિનીરાજિતપદામ્બુજઃ ।
પદ્મતીર્થસ્થિતાશ્વત્થો નરો નારાયણો મહાન્ ॥ ૧૬॥

ચન્દ્રભાગાસરોનીરકેલિલોલદિગમ્બરઃ ।
સસધ્રીચીત્સવીષૂચીરિતિશ્રુત્યર્થરૂપધૃક્ ॥ ૧૭॥

જ્યોતિર્મયક્ષેત્રવાસી સર્વોત્કૃષ્ટત્રયાત્મકઃ ।
સ્વકુણ્ડલપ્રતિષ્ઠાતા પઞ્ચાયુધજલપ્રિયઃ ॥ ૧૮॥

ક્ષેત્રપાલાગ્રપૂજાર્થી પાર્વતીપતિપૂજિતઃ ।
ચતુર્મુખસ્તુતો વિષ્ણુર્જગન્મોહનરૂપધૃક્ ॥ ૧૯॥

મન્ત્રાક્ષરાવલીહૃત્સ્થકૌસ્તુભોરઃસ્થલપ્રિયઃ ।
સ્વમન્ત્રોજ્જીવિતજનઃ સર્વકીર્તનવલ્લભઃ ॥ ૨૦॥

વાસુદેવો દયાસિન્ધુર્ગોગોપીપરિવારિતઃ ।
યુધિષ્ઠિરહતારાતિર્મુક્તકેશી વરપ્રદઃ ॥ ૨૧॥

બલદેવોપદેષ્ટા ચ રુક્મિણીપુત્રનાયકઃ ।
ગુરુપુત્રપ્રદો નિત્યમહિમા ભક્તવત્સલઃ ॥ ૨૨॥

ભક્તારિહા મહાદેવો ભક્તાભિલષિતપ્રદઃ ।
સવ્યસાચી બ્રહ્મવિદ્યાગુરુર્મોહાપકારકઃ ॥ ૨૩॥

ભીમામાર્ગપ્રદાતા ચ ભીમસેનમતાનુગઃ ।
ગન્ધર્વાનુગ્રહકરો હ્યપરાધસહો હરિઃ ॥ ૨૪॥

સ્વપ્નદર્શી સ્વપ્નદૃશ્યો ભક્તદુઃસ્વપ્નશાન્તિકૃત્ ।
આપત્કાલાનુપેક્ષી ચાનપેક્ષેઽપેક્ષિતો જનૈઃ ॥ ૨૫॥

સત્યોપયાચનઃ સત્યસન્ધઃ સત્યાભિતારકઃ ।
સત્યાજાની રમાજાની રાધાજાની રથાઙ્ગભાક્ ॥ ૨૬॥

સિઞ્ચનઃ ક્રીડનો ગોપૈર્દધિદુગ્ધાપહારકઃ ।
બોધિન્યુત્સવયુક્ તીર્થઃ શયન્યુત્સવભૂમિભાક્ ॥ ૨૭॥

માર્ગશીર્ષોત્સવાક્રાન્તવેણુનાદપદાઙ્કભૂઃ ।
દધ્યન્નવ્યઞ્જનાભોક્તા દધિભુક્કામપૂરકઃ ॥ ૨૮॥

બિલાન્તર્ધાનસત્કેલિલોલુપો ગોપવલ્લભઃ ।
સખિનેત્રે પિધાયાશુ કોઽહમ્પૃચ્છાવિશારદઃ ॥ ૨૯॥

સમાસમપ્રશ્નપૂર્વમુષ્ટિમુષ્ટિપ્રદર્શકઃ ।
કુટિલીલાસુ કુશલઃ કુટિલાલકમણ્ડિતઃ ॥ ૩૦॥

સારીલીલાનુસારી ચ વાહક્રીડાપરઃ સદા ।
કાર્ણાટકીરતિરતો મઙ્ગલોપવનસ્થિતઃ ॥ ૩૧॥

માધ્યાહ્નતીર્થપૂરેક્ષાવિસ્માયિતજગત્ત્રયઃ ।
નિવારિતક્ષેત્રવિઘ્નો દુષ્ટદુર્બુદ્ધિભઞ્જનઃ ॥ ૩૨॥

વાલુકાવૃક્ષપાષાણપશુપક્ષિપ્રતિષ્ઠિતઃ ।
આશુતોષો ભક્તવશઃ પાણ્ડુરઙ્ગઃ સુપાવનઃ ॥ ૩૩॥

પુણ્યકીર્તિઃ પરં બ્રહ્મ બ્રહ્મણ્યઃ કૃષ્ણ એવ ચ ।
અષ્ટોત્તરશતં નામ્નાં વિઠ્ઠલસ્ય મહાત્મનઃ ॥ ૩૪॥

ઇતિ તે કથિતં દેવિ પવિત્રં મઙ્ગલં મહત્ ।
ત્રિકાલમેકકાલં વા યઃ પઠેન્નિયતઃ શુચિઃ ॥ ૩૫॥

કરસ્થાઃ સિદ્ધયસ્તસ્ય સત્યં સત્યં વદામ્યહમ્ ।
અપુત્રો બહુપુત્રઃ સ્યાદવિદ્યઃ સર્વવિદ્યતે ॥ ૩૬॥

નિર્ધનો ધનદો નૂનં ભવેદસ્ય નિષેવણાત્ ।

અવિનાભૂતભાર્યશ્ચ જિતારાતિર્નિરામયઃ ॥ ૩૭॥

બહુનોક્તેન કિં દેવિ હરિવલ્લભતામિયાત્ ।
સૂત ઉવાચ
શ્રુત્વા તન્મહદાશ્ચર્યમષ્ટોત્તરશં પરમ્ ॥ ૩૮॥

પુનઃ પુનઃ પ્રણમ્યેશં પાર્વતી વાક્યમબ્રવીત્ ।
પાર્વત્યુવાચ
તત્ક્ષેત્રવસતિશ્ચૈવ તત્તીર્થસ્યાવગાહનમ્ ॥ ૩૯॥

તન્મૂર્તિદર્શનં ચૈવ તન્નામાવલિકીર્તનમ્ ।
દેહિ મે સર્વદા સ્વામિન્નેકાગ્રમનસા વિભો ॥ ૪૦॥

શ્રીશઙ્કર ઉવાચ
તદસ્તુ તવ દેવેશિ મમાપ્યેતન્મનીષિતમ્ ।
ઇત્યુક્ત્વા પ્રયયૌ તસ્ય નિવાસં પરમાદરાત્ ॥ ૪૧॥

ઇતિ શ્રીપદ્મપુરાણાન્તર્ગતં શ્રીવિઠ્ઠલાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*shrIviThThalAShTottarashatanAmastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*